CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

09

उपाकर्म प्रयोग:

Script:- Devanagari.

Meterials- P.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उपाकर्मप्रयोगः श्रीरामचंद्रायनमः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्स॰ ॥श्रीगणेशाय नमः॥ ॐ उपाकर्मदिने प्रातः शुचौ देशे सुस्नातः स्वामी नाचार्यः प्राणानाय
म्य देशकालौ संकीर्त्य मम शिष्याणां चाधीतानां चाध्येष्यमाणानां छंदसां यातयामता
१ निरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जनाख्यं कर्म करिष्ये॥ इति संकल्प्य॥ स्थं
डिलोल्लेपनाद्यग्निप्रतिष्ठापनांतं कृत्वा समिद्द्वयमादाय तिथ्यादिकमुच्चार्यास्मिन्नुत्सर्जनहो
मे देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां
धारणां सदसस्पतिं अनुमतिं छंदांस्यृषीनेताः प्रधानदेवताः आज्येन अग्निं अप्सुणं सूर्यं
अग्निं शकुंतं अग्निं मित्रावरुणौ अग्निं अपः अग्निं मरुतः अग्निं विश्वान्देवान् अग्निं इंद्रा सोमं
सोमौ इंद्र अग्निं मरुतः पवमानं सोमं अग्निं संज्ञानं एताः प्रधानदेवताः गृहसिद्धान्नच
रुद्रव्येण शेषेण स्विष्टकृतमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वान्वाधाय परिसमूहनाद्याज्य राम
दर्भाग्रहुयप्रक्षेपणांतं कृत्वा॥ सिद्धान्नचरुस्थालीस्थानादि तत्पात्रनिधानाज्येन सह त्रिः१ १
येग्नि कृत्वाज्योद्वासनादि स्रुवसंमार्जनांतं कृत्वा चरुमग्नावधिश्रित्य त्रिरभिघार्योदगुद्वाऽ
ताराप्र जनं स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धानि कृत्वा॥ पुनस्तथ्यादि संकीर्त्य२

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्याद्दक्षिणतो बर्हिष्यासाद्यापुनरभिघार्याज्यभागांतं कृत्वास्रुवेणाज्येनन वप्रधानाहु
तीर्जुहुयात्॥ॐ सावित्र्यैस्वाहा। सावित्र्याइदंनममेतियथादैवतत्यागः।ॐ ब्रह्मणेस्वा०ब
ह्मणइ०श्रद्धायै०मेधायै०प्रज्ञायै०धारणायै०सदसस्पतये०अनुमतये०छंदोभ्यऋषिभ्यः
स्वाहा॥स्रुच्यवदानधर्मेणासिद्धांनमवदायमंत्रैःप्रधानाहुतीर्जुहुयात्॥पंचावत्तीनास्वि
ष्टकृतीयंभागंप्रार्थ्यपंचावत्तीमंत्रंपठेत्॥ॐ प्रसूतोभक्षमकरं चरावपि०जमदग्नीदमस्वाहा
अग्निमीळेमधुछंदा अग्निर्गायत्री उत्सर्जनप्रधानगृह्यसिद्धानचरुहोमेविनियोगः॥ॐ
अग्निमीळेपुरोहितं०धातमंस्वाहा॥अग्नयइदं०॥कुषुंभकस्तेन्मेत्रावरुणिरगस्त्योऽक्ष्ण
सूर्योमानुष्टुप्॥ॐ कुषुंभकस्तदब्रवीत०वृश्चिकतेविषंस्वाहा॥अब्द्रूपसूर्यायेदं०॥त्व
मग्नेशौनकोगृत्समदोऽग्निर्जगती॥ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिः०नृपतेजायसेशु
चिःस्वाहा।अग्नयइदं०॥आवदस्त्वंगृत्समदःशकुंतोजगती॥ॐ आवदस्त्वंशकुने०सुवी
राःस्वाहा॥शकुंतायेदं०॥सोमस्यमागाथिनोविश्वामित्रस्त्रिष्टुप्॥सोमस्यमातवसं०

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्स० तन्वंजुषस्वस्वाहा॥अग्नयइ०॥गृणानाभार्गवोजमदग्निर्मित्रावरुणौगायत्री।ॐगृणा
नाजमदग्निना०मृतावृधास्वाहा॥मित्रावरुणाभ्यामिदं०॥त्वांह्यग्नेवामदेवोग्निरष्टी।ॐ
२ त्वांह्यग्नेसद०जनतप्रचेतसस्वाहा॥अग्नयइ०।धामंतेगोतमोवामदेवआपोजगती।ॐ
धामंतेविश्वं०मधुमंतंतऊर्मिंस्वाहा॥अद्भ्यइ०॥अबोध्यग्निरात्रेयोबुधगविष्ठिरावग्नि
स्त्रिष्टुप्॥ॐअबोध्यग्निःसमिधा०नाकमच्छस्वाहा॥अग्नयइ०॥गंतानआत्रेयएव
यामरुन्मरुतोतिजगती॥ॐगंतानोयज्ञंयज्ञियाः०दुर्धर्तवोनिदःस्वाहा।मरुद्भ्यइ०॥
त्वंह्यग्नेभारद्वाजोग्निस्त्रिष्टुप्॥ॐत्वंह्यग्नेप्रथमोमनोता०सहध्वेस्वाहा।अग्नय०।यो
नस्त्वःपायुर्भारद्वाजोविश्वेदेवानुष्टुप्॥ॐयोनःस्वोअरणः०ममांतरंस्वाहा॥विश्वेभ्यो
देवेभ्यइ०॥अग्निंनरोमैत्रावरुणिर्वसिष्ठोग्निर्विराट्॥ॐअग्निंनरोदीधितिभिर०म राम
थर्युंस्वाहा॥अग्नयइ०॥प्रतिचक्ष्वमैत्रावरुणिर्वसिष्ठइंद्रासोमावनुष्टुप्॥ॐप्रतिच २
क्ष्वविचक्ष्वं०यातुमद्भ्यःस्वाहा॥इंद्रासोमाभ्यामिदं॥मोचित्काण्वःप्रगाथऐंद्रोबृह

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥श्रीगणेशाय नमः॥ अथ उत्सर्जन उपाकर्म प्रयोग लिख्यते॥ अध्यायनमुपाकर्म श्रावण्यां श्रव
णेन तु॥ तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते॥१॥ अत्र छ्योपधयस्मिन्मासे न तु भवं त्यजेत्॥
तदा भाद्रपदे मासि श्रवणेन करोति तत्॥२॥ सर्वधर्मविवकारी गोप्ता मस्तकलाद्विजः॥ ममदे
हस्य संशुद्धिं कुर्वीत द्विजसत्तमाः॥३॥ दंडोसभातवाक्यं च पातकं स्थितिसागतां॥ अहो ब्रह्मस
भायां तु सद्यः शुचिमवाप्नुयात्॥४॥ अथ प्रयोगः॥ आचम्य प्राणानायम्य देशकालौ सं
कीर्त्य॥ मम एतेषां ब्राह्मणानां चाधीतानां छंद आदीनां यातयामतानिरासेनाप्यायनद्वा
राश्रीपरमेश्वरप्रीत्यर्थं अंतरितोत्सर्जनाख्यं कर्म करिष्ये॥ उत्सर्जनादिहोमं कर्तुं स्थंडिला
दिकर्म करिष्ये॥ स्थंडिलं उपलिप्य उल्लिख्य षट् लेखा उदगायतां पश्चात्प्रागायते तानांत
योस्तिस्तोमध्ये दत्तं अभ्युक्ष्याग्निं प्रतिष्ठाप्य॥ जुष्टोदमूना आत्रेयो वसु• एह्यग्ने राकुगणो गोत

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अग्निमुख
१

अग्न्यावाहने वि०॥ ॐ जुष्टो दमूना अतिथिर्त्रिक् १॥ एह्यग्न इह होता ऋक् १॥ इत्यक्षतैरावाह्य
आच्छादनं दूरीकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती॥ अग्निप्रतिष्ठाप
ने विनियोगः॥ ॐ भूर्भुवः स्वरों भूः बलवर्धननामाग्निं प्रतिष्ठापयामि॥ प्रोक्षितेंधनानि॥
प्य वेणुधमन्या प्रबोध्य ध्यायेदेवं॥ चत्वारिशृंगा गोतमो वामदेवोग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्या
ने विनियोगः॥ ॐ चत्वारिशृंगा त्रयो अस्य पादाः ५॥ अग्ने वैश्वानर शांडिल्यगोत्र मेषध्व
ज प्राङ्मुख मम सन्मुखो भव॥ क्रियमाणोत्सर्जनहोमे देवतापरिग्रहार्थमन्वाधानं करि
ष्ये॥ अस्मिन्नन्वाहितेग्नौ जातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं चाघारदेवते आ
ज्येन॥ अग्निषोमौ चक्षुषी आज्येन। अत्र प्रधानं॥ सावित्रीं। ब्रह्माणीं। श्रद्धां। मेधां। प्र
ज्ञां। धारणां। सदसस्पतिम्। अनुमतिं। छंदांसि ऋषीन्। एताः प्रधानदेवताः आज्यद्रव्ये
णं पुनरत्र प्रधानं॥ अग्निं। अह्नण सूर्यान्॥ अग्निं। शाकुंतं। आग्निं। मित्रावरुणौ। अग्निं॥ १

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यज्ञोपवीतेपरमीसीनु २ दधिसक्तुदृष्मन २

अपः।अग्निं।मरुतः।अग्निं।विश्वान्देवान्।अग्निं।इंद्रासोमौ।इंद्रं।अग्नामरुतः।पवमा
नसोमं।सोमं।अग्निं।संज्ञानं।एताः प्रधानदेवताः॥ग्रहसिद्धान्नचरुद्रव्येण॥शेषेणस्विष्ट
कृतमग्निमिध्मसन्नहनेनरुद्रं अयासमग्निं देवान्विष्णुं अग्निं वायुं सूर्यं प्रजापतिं च एताः प्रायश्चित्त
देवता आज्येन ज्ञाताज्ञातदोषनिबर्हणार्थं त्रिवारमग्निं मरुतश्चाज्येन विश्वान्देवान्संस्रावेण अं
गदेवताः प्रधानदेवताः सर्वाः सन्निहिताः संतु एवं सांगोपांगेन कर्मणा सद्यो यक्ष्ये॥समस्तव्याहृ
तीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृहती॥अन्वाधानसमिद्धोमे विनियोगः॥ॐ भूर्भुवः स्वः स्वा
हा॥प्रजापतय इदं०॥इध्माबर्हिषोः संनहनं।परिसमोहनं।परिस्तरणं।पर्युक्षणं॥अग्नेर्दक्षि
णतो ब्रह्मासनार्थं तत उत्तरतश्च पात्रासादनार्थं कांश्चित्प्रागग्रान्दर्भान्स्तृणीयात्॥चरुस्थाली
प्रोक्षिण्यौ दर्वी स्रुवौ प्रणीता आज्यपात्रे इध्माबर्हिषी। द्वे द्वे उदगपवर्गं प्राक्संस्थान्युत्तान्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अग्निमुख दयेत्॥ ततः प्रोक्षणीपात्रमुत्तानं कृत्वा तत्रानंतर्गर्भितसाग्रसमस्थप्रादेशमात्रकुशद्व
यरूपे पवित्रे निधाय। शुद्धाभिरद्भिस्तत्पात्रं पूरयित्वा। गंधपुष्पाक्षतान्निक्षिप्य। हस्तयोरंगु
२ पकनिष्ठिकाभ्यां मुदगग्रे पृथक् पवित्रे धृत्वा अपस्त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इध्मं च विस्र
स्य सर्वाणि पात्राणि त्रिः प्रोक्षयेत्। ता आपः किंचित्कमंडलौ क्षिपेदित्येके॥ ततः प्रणीतापात्र
मग्नेः प्रत्यङ् निधाय॥ ते पवित्रे प्रागग्रे निधाय। उत्पूताभिरद्भिः तत्पात्रं पूरयित्वा गंधपुष्पा
क्षतान्निक्षिप्य मुखसममुद्धृत्य। ॐ ब्रह्मन्नपः प्रणेष्यामि बृहस्पतिर्ब्रह्मा ब्रह्मसदन आ
शिष्यते बृहस्पते यज्ञं गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि भूर्भुवः स्वर्बृहस्प
अग्नेः तिप्रसूतः। ॐ प्रणय। उत्तरतो दर्भेषु निधाय ते पवित्रे गृहीत्वा॥ अन्यैर्दर्भैराच्छादयेत्॥
तू पवित्रे आज्यपात्रे निधाय तत्पात्रं पुरतः संस्थाप्य तस्मिन्नाज्यमासिच्य अग्नेरुत्त २

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्जनं वेदसंबंधो भवेत्स्विष्टकृते तथा। शौनकः॥ दधिक्राव्णो वामदेवो दधिक्रा वानुष्टुप्॥
दधिसक्तुप्राशने वि० ॐ दधिक्राव्णो अकारिषं० पिता रिष ह्स्वाहा। यज्ञोपवीतमित्यस्य प
रब्रह्म परमात्मा त्रिष्टुप्। यज्ञोपवीत होमे वि० ॐ यज्ञोपवीतं० बलमस्तु तेजः स्वाहा। परमा
सनइदं। अस्मिन्नुपाकर्मणि मम समस्त पितृप्रीत्यर्थं यज्ञोपवीत दानं करिष्ये। उपवीत द
नं दत्वा स्वयं धारयेयुः। ब्रह्मचारिणश्च मौंजीयज्ञोपवीतं दत्वा। पुराणानि जले क्षिपेयुः॥
सर्वैः सह आचार्यः प्रत्यगग्नेः प्रागग्रास्तीर्णेषु दर्भेषु उपविश्य। सर्वैः सह प्राणायामं कृत्वा
उत्सर्जनवत्सर्वं ब्रह्मयज्ञं कृत्वा। उपाकृता वेदाः इत्याचार्योपविश्य भूमिं स्पृष्ट्वा अंजे
लिस्थ दर्भान् क्षिप्त्वा कटौ निवेश्य अप उपस्पृश्य। प्रायश्चित्तादि होमं कर्मशेषं समाप्य। वे
दप्रीत्यर्थं ब्राह्मणान् भोजयेत्। इत्युपाकर्म॥ नूतनब्रह्मचारिणो विशेषः। अस्य ब्र
ह्मचारिणो वेदग्रहणाधिकारसिद्धि द्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं कर्म
करिष्ये। गणेशपूजनस्वस्तिवाचनमातृकापूजननान्दीश्राद्धानि कृत्वा। यज्ञोपवी

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तधारणं तेन कक्षटिसूत्रकौपीनवस्त्रमेखलादंडाजिनानि धारयित्वा पुराणानि
जलेक्षिपेत्। इति श्रीनारायणभट्टकृते प्रयोगरत्ने उत्सर्जनोपा[illegible]प्रयोगः॥ अनु
प्तबीजे नृपतौ निविष्टे गुरौ मृते राष्ट्र उपप्लवे च॥ उत्सर्जनोपाकरणे [illegible]स्ते दुरुक्तो
मितेगुरोच॥ ॐ क्षुधुश्च हुताग्निश्च पाणिश्शूर्पस्त्कवादिभिः॥ न कुर्यादग्निधमनं तुल
र्यो ह्यजनादिना॥ मुखेनैव च मदग्निं मुखं देवह्यजायतः॥ नाग्निं मुखेनेति नु यल्लो
किकेयो जपेदिति॥ श्रीराम जय राम जय जय राम॥ श्रीगणेशार्पणमस्तु॥ श्री॥ श्री
श्रीगणेशाय नमः॥ रामायन महद्धाय मने धसे रघुनाथाय

अ[illegible]

श्री

रा

२

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रतस्थितांगारान्भस्मनासहाग्नेरुदक्परिस्तरणाद्बहिर्निरूह्य तेषुतेषु आज्यपात्रमधिश्रित्यज
ल्लतादर्भेणावज्वाल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्यपुनर्ज्वलतातेनैवदर्भे
णचरुणासहाज्यंत्रिःपर्यग्निकृत्वातदुल्मुकंनिरस्याअपउपस्पृश्यआज्यपात्रमुदिकर्षति
वोदगुद्वास्यअंगारानग्नौप्रत्यस्यापस्पृश्यातत्रस्थमेवाज्यं॥सवितुर्वाहिरण्यस्तूपःसविता
पुरउष्णिक्॥आज्यस्योत्पवनेविनियोगः॥ॐसवितुष्ट्वाप्रसवउत्पुनाम्यछिद्रेणपवित्रेणवसोः
सूर्यस्यरश्मिभिः॥प्रागुत्पुनातिसकृन्मंत्रेणाद्विस्तूष्णीं॥तेपवित्रेअद्भिःप्रोक्ष्याग्नौप्रहरेत्॥स्कं
दायस्वाहा॥स्कंदायेदं०।अग्नेःपश्चात्परिस्तरणाद्बहिःआत्मनोऽग्रतोभूमिं प्रोक्ष्यतत्रबर्हिः
संनहनींरज्जुमुदगग्रांप्रसार्य।तस्यांबर्हिःप्रागग्रमुदगपवर्गमविरळमास्तीर्यतस्मिन्नाज्य
पात्रंनिधायस्रुवादिसंमार्जयेत्॥दक्षिणेनहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भाना

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

अग्निमुख ३ दायसहैवाग्नौ प्रताप्य स्रुचं निधाय दक्षिणहस्तेन स्रुवस्य बिलं दर्भाग्रैः प्रागादि प्रागपवर्गं त्रिः
परिसमृज्य ततो दर्भाणां मूलैर्दंडस्याधस्तादिलपृष्ठदारभ्य यावदुपरिष्टादिलं तावत्त्रिः स
मृज्याद्भिः प्रोक्ष्य स्रुवं निधायाज्यस्थाल्या उत्तरतो असंस्पृष्टं निधाय कृतसंमार्गान्कुशानग्नौ
क्षिप्याग्नौ प्रहरेत्॥ चरुमग्नावधिश्रित्याभिघार्योदगुद्वास्याग्न्याज्ययोर्मध्येन नीत्वाज्याद्दक्षि
णतो बर्हिषि सांतरमासाद्य हविरुद्धरणार्थं पात्रं तरं चेदाज्यमध्ये निधाय॥ विश्वानि न इति ति
सृणां आत्रेयो वसुश्रुतोग्निस्त्रिष्टुप्॥ द्वाभ्यामग्न्यचनिंत्योपस्थाने विनियोगः॥ ॐ विश्वानि
नो दुर्गहा जातवेदः०३॥ ततः आत्मानं चालंकृत्य हस्तं प्रक्षाल्य इध्मबंधनरज्जुमिध्मस्था
नेनिधाय पाणिनेध्ममादाय मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य मूलमध्ययोर्मध्यभागे राम
गृहीत्वा॥ अयं ते वामदेवो जातवेदा अग्निस्त्रिष्टुप्॥ इध्मदहने विनियोगः॥ अयं त इध्म आ ३

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्मजातवेदस्तेन इध्यस्ववर्धस्व चेद्ध वर्धय चास्मान्प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय
स्वाहा॥ जातवेदसे अग्नय इदं०॥ आघार होमे वायव्यकोणमारभ्य आग्नेयकोण पर्यंतं॥ प्रजापत
ये स्वाहा॥ प्रजापतय इदं०॥ निर्ऋत्यकोणमारभ्य ईशानकोण पर्यंतं॥ प्रजापयेत स्वाहा॥ प्रजा
पतय इदं०॥ अग्नेरुत्तरपार्श्वे अग्नये स्वाहा। अग्नय इदं०॥ अग्ने दक्षिणपार्श्वे तत्समप्रदेशे सो
माय स्वाहा॥ सोमायेदं०॥ अथ प्रधानाहुतिं जुहुयात्॥ ॐ सावित्र्ये स्वाहा॥ सावित्र्या इदं०॥
ब्रह्मणे स्वा०॥ ब्रह्मण इदं०॥ श्रद्धायै०॥ श्रद्धाया इदं०॥ मेधायै स्वा०॥ मेधाया इ०॥ प्रज्ञायै स्वा०॥
प्रज्ञाया०॥ धारणायै० धारणाया इ०॥ सदसस्पतये स्वा०॥ सदसस्पतय इदं०॥ अनुमतये स्वा०॥ अ
नुमतय इदं०॥ छंदोभ्य ऋषिभ्यः स्वा०॥ छंदोभ्य ऋषिभ्य इदं०॥ पंचावर्त्ती मंत्र पठेत्॥ प्रस्तोभ
क्षमकरं चरावपि०॥॥ अवदानमंत्रे॥ अग्निमीळे इत्यादि समानीव इत्यंतः॥ यदस्योतिरि

उपाकर्मे प्रधान दधिसक्तु होमे विनियोगः
रेण।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इधिसचून्याभीयुः यज्ञो॰ वीत॰

स्विष्टकृति

अग्निमुख रण्यगर्भोग्निरति धृतिः॥ स्विष्टकृद्धोमे विनियोगः॥ ॐ यदस्य कर्मणोत्यरीरिचं यद्वान्यूनमिहा
४/ त करं॥ अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्राय
श्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा॥ अग्नये स्विष्टकृत इदं वा
रज्जुं प्रहृत्य॥ रुद्राय पशुपतये स्वाहा॥ रुद्राय पशुपतय इदं॰॥ ब्रह्मयज्ञं कृत्वा॥ ततः आचा
र्य प्रायश्चित्तादि होमशेषं समाप्य॥ अयाश्चेति विमदो अयाग्निः पंक्तिः॥ उत्तरांग प्रायश्चि
त्ताज्य होमे विनियोगः॥ ओं अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि॥ अयासा
वयसा कृतो यासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा॥ अयसे अग्नय इदं॰॥ अतो देवा ऽ
देवा इति द्वयोर्मेधातिथिर्गायत्री॥ प्रायश्चित्ताज्यहोमे वि॰॥ अतो देवा अवन्तु नो॰ पृथिव्याः॥ दे
वेभ्य इदं॰॥ इदं विष्णुर्वि चक्रमे॰ समूढमस्य॰॥ विष्णव इदं॰। व्यस्त समस्त व्याहृतीनां विश्वा ४

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

मित्रजमदग्निर्भरद्वाजभृगव ऋषयः। अग्निर्वायुः सूर्यप्रजापतयो देवता। गायत्र्युष्णिग
नुष्टुब्बृहत्यश्छंदांसि। प्रायश्चित्ताज्यहोमे विं०॥ ॐ भूः स्वाहा। अग्नय इदं०। ॐ भुवः स्वाहा। वा
यव इदं०। ॐ स्वः स्वाहा। सूर्यायेदं०। ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं०। अनाज्ञातमिति
मंत्रद्वयस्य हिरण्यगर्भोग्निस्त्रिष्टुप्। ज्ञाताज्ञातदोषनिबर्हणार्थं प्रायश्चित्ताज्याहुति होमे विं०
ॐ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं स्वा
हा। अग्नय इदं०। पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने तदस्य०। अग्नय इदं०। [illegible]
[illegible] यत्पाकत्रेत्याप्त्यस्त्रितोग्निस्त्रिष्टुप्। न्यूनातिरिक्तप्रायश्चित्ताज्यहोमे विं०॥
ॐ यत्पाकत्रा मनसा दीनदक्षाः०। अग्निष्टद्धोता क्रतुविद्विजानन्०। अग्नय इदं०। यद्वो देवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अग्निमुख
५

अभितपाम रुतास्त्रिष्टुप्॥ मंत्राविपर्यासनिमित्त प्रायश्चित्ताज्य होमे वि०॥ यद्वो देवा अतिपातयानि
वाचा च प्रयुती देव हे ळनं॥ अरायो अस्माँऽ अभिदुच्छुनायते न्यत्रास्मन्म रुतस्तं निधेतन स्वाहा॥ म
रुद्भ्य इदं०॥ सांगतासिध्यर्थं सर्व प्रायश्चित्तं करिष्ये॥ ॐ भूर्भुवः स्वः स्वाहा॥ प्रजापतय इदं०॥ विश्वेभ्यो
देवेभ्यः स्वाहा॥ विश्वेभ्यो देवेभ्य इदं॥ बर्हिषि पूर्णपात्रं निनयेत्॥ पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सु
पूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः॥ अक्षितिरसि मा मे क्षेष्ठाः॥ अभिमंत्र्य॥ प्राच्यां
दिशि देवा ऋत्विजो मार्जयंतां॥ दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां॥ अप उपस्पृश्य॥ प्रतीच्यां
दिशि गृहाः पशवो मार्जयंतां॥ उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां॥ ऊर्ध्वायां दिशि यज्ञः
संवत्सरः प्रजापतिर्मार्जयंतां॥ आपो अस्मानित्यस्य देवश्रवा आपस्त्रिष्टुप्॥ मार्जने वि०॥ आपो अ यज्ञ
स्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु॥ विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत एमि॥ ८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इदमापःसिंधुद्वीपआपोनुष्टुप्॥मार्जने०॥इदमापःप्रवहत०।यद्वाहमभिदुद्रोहयद्वा०।सुमित्रियानआप
ओषधयःसंतु॥दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीतिनिर्ऋत्यांकुशान्क्षिप्त्वा॥ओंमाहंप्रजां
परासिचंयानःसयावरीःस्थन॥समुद्रेवोनिनयामिःस्वंपाथोअपीथ॥इतिपाणिभ्यांपश्चिमाभिमुखंपू
र्णपात्रंबर्हिषिस्थापयेत्यजमानोपासित्वापाणिस्थजलेनात्मानंपत्नींचप्रोक्षयेत्॥ताआपःसमुद्रंगच्छंतु॥ ॥
तत्रगंगादिपुण्यनदीःस्मरन्॥प्रागादिपरिस्तरणान्युत्तरेविसृजेत्॥परिसमोहनं॥पर्युक्षणं॥विश्वानि
नइतितिसृणांआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप्॥द्वाभ्यामग्न्यर्चनेत्योपस्थानेच०॥विश्वानिनोदुर्गहाजातवेदः०॥३॥
अग्नयेनमःगंधं।अग्नयेन०पुष्पं०अग्न०धूपं०अग्न०दीपं०अग्नयेनमःकृतनैवेद्यंस०प्राणापानोव्यानउ
दानःसमानः॥नैवेद्यांतरंआचमनीयंस०हस्तप्रक्षालनं०मुखप्रक्षालनं०करोद्वर्तनं॥तांबूलं।दक्षिणां।अग्नि
स्तकेविश्ववस्तमं०॥अग्निर्ददातिसत्पतिं०॥मानस्तोकेकुत्सोरुद्रोजगती॥विभूतिग्रहणेवि०॥ओंमानस्तोकेत
नयेमानआयौ०॥त्र्यायुषंजमदग्नेरितिललाटे॥कश्यपस्यत्र्यायुषंकंठे।अगस्त्यस्यत्र्यायुषंनाभौ॥यद्देवानां
त्र्यायुषंदक्षिणस्कंदे।तन्मेअस्तुत्र्यायुषमितिवामस्कंदे॥सर्वमस्तकेशतायुषमितिशिरसि॥ओंचमेस्व०स्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

अग्निमुख
५

स्तिश्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनः। दीर्घमहव्यवाहनौं
नमो नमः॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः॥ यस्य स्मृ
त्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं॥ अनेन उत्सर्जन होमेन
भगवान्यज्ञनारायणस्वरूपी परमेश्वरः प्रीयतां॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर॥ यत्र ब्रह्मा
दयो देवास्तत्र गच्छ हुताशनः॥ उदकतीरं गत्वा॥ शुभं भवतु॥ अग्निमुखसमाप्तं॥ श्री॥ यज्ञोपवीत
मिति मंत्रस्य परब्रह्म परमात्मा त्रिष्टुप्॥ श्रौतस्मार्तकर्मानुष्ठानसिध्यर्थं यज्ञोपवीताभिमंत्रणं च करिष्ये॥
तथा च यज्ञोपवीतधारणं करिष्ये॥ यज्ञोपवीतमार्जनं॥ आपोहिष्ठेति तिसृभिः। ब्राह्मणोत्पादितं सूत्रं विष्णु
ना त्रिगुणीकृतं॥ रुद्रेण दीयते ग्रंथी सावित्र्या अभिमंत्रितं॥ अथ न्यासं कुर्यात्॥ ॐकार प्रथमतंतुन्य
सामि॥ अग्निं द्वितीय॰ नागान्तृतीय॰ सोमं चतुर्थतं॰ पितॄन्पंचमतं॰ प्रजापतिं षष्ठमं॰ वायुं सप्तमं॰ सूर्यम ६
ष्टमतं॰ विश्वान्देवान्नवमतं॰ अभिमंत्र्य॥ देवस्येति हस्ते गृहीत्वा॥ गायत्र्या मंत्रेण त्रिस्ताडयेत्॥
त्वे
सूर्यं प्रदर्शयित्वा॥ उदुत्यं जातवेदसं॰ नमो मित्रस्य॰ सूर्यो नो दिवः॰ कद्रुद्राय प्र॰ दश गायत्रीर्जपित्वा॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यज्ञोपवीतधारणेवि० ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजा
यज्ञोपवीतमितिमंत्रस्य परब्रह्म परमात्मा त्रिष्टुप् ॥ यज्ञोपवीतंबलमस्तु तेजः ॥ ॥ अथ समादीपदानविधिः ॥
पतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतंबल मस्तु तेजः ॥ ॥ अथ समादीपदानविधिः ॥ ...
पतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ ॥ अथ समादीपदानविधिः ॥

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८ सैकांतिथिर्वारयुताकृताप्ताशेषेगुणैर्भ्रं भुविवह्निवासः॥सौरव्याय होमे सशियुग्मेशेषेप्राणार्थना
शोदिविभूतलेच॥तरणिवितमृगुभास्करिचंद्रमाकुजसुरेज्यविधुंतुदकेतवः॥रविभतोदिनभंगण
येत्क्रमात्त्रातिरवर्गत्रितयंत्रितयंन्यसेत्॥आयुर्बलंयशोवर्चः प्रजाः पशुवसूनिच॥ब्रह्मप्रज्ञांचमे
धांचतन्नोधेहिवनस्पते॥३॥सू०चं०मं०बु०बृ०भृ०श०रा०के०ग्रहाचेमुखीआकृतीउत्तमकनिष्ट
म·उ·अ·उ·उ·उ·अ·अ·अ·
द्रे सूर्यभात्त्रित्रिभेवं सूर्यवित्भृकपंगवः॥चंद्रारेज्यागुसीरवीनेनप्राहोमाकृतिः रवले॥१॥

८

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ती॥ॐ माचिदन्यद्विशंसत० चशंसतस्वाहा॥इंद्राये०॥१५॥आग्नेयाद्यांगिरसः सोमाहि
राग्निमारुतमनुष्टुप्॥ॐ आग्नेयाहिमरुत्सखा० स्वस्वर्णरेस्वाहा॥अग्निमरुद्भ्य इ०॥
स्वादिष्ठयावैश्वामित्रोमधुछंदाः पवमानः सोमो गायत्री॥ॐ स्वादिष्ठयामदिष्ठया० वेसु
तः स्वाहा॥सोमपवमानाये०॥यत्तेराजन्मारीचः कश्यपः सोमः पंक्तिः॥ॐ यत्ते राजञ्छृतंह
विः० इंद्रायेंदोपरिस्रवस्वाहा॥सोमाये०॥अग्ने बृहन्नाप्यस्त्रितोग्निस्त्रिष्टुप्॥ॐ अ
ग्ने बृहन्नुषसा० सद्यान्यप्राः स्वाहा॥अग्नय इ०॥समानीवः संवननः संज्ञानमनुष्टु
पू॥ॐ समानीव आकूतिः० सहासति स्वाहा॥संज्ञानायेदं०॥ततः स्विष्टकृतं हुत्वा
रज्ञं कृप्रहृत्य सर्वैः सह प्राणायामं कृत्वा॥ब्रह्मयज्ञ॥पृथ्वीतिमंत्रस्य० इत्यादि शांतिः शां
तिः शांतिः॥ब्रह्मयज्ञं कृत्वा॥अनावाध्येतदंतमन्यानि वाचयेत्॥यथाचारैः शिष्यैः सहो
ध्याय॥संज्ञानमुशनावदत्॥संज्ञानंवरुणोवदत्॥संज्ञानमिंद्रश्चाग्निश्च संज्ञानंस
वितावदत्॥उस्रघ्रावेवदाः॥इत्युक्त्वा उपाविश्य भूमिंस्पृष्ट्वा॥पउपस्पृश्य ब्रह्मणोह

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्त्वेवेदं दद्यात्॥वृष्टिरसीति जलं स्पृष्ट्वा॥प्रायश्चित्तहोमं शेषं समाप्य उदकतीरं गत्वा
शरीरशुध्यर्थं उत्सर्जनांगत्वेन गंगास्नानं करिष्ये॥सचैलं स्नात्वाचम्य प्राणानायम्य दे
शकालौ स्मृत्वा उत्स० मलापकर्षणस्नानं करिष्ये॥आपोहिष्ठेत्यृचेन स्नानं॥स्नात्वाच
म्य॥उत्सर्जनां० भस्मस्नानं करिष्ये॥ईशानः सर्वविद्यानां०॥शिरसि।तत्पुरुषाय विद्म
हे० मुखे॥अघोरेभ्योथघोरेभ्यो० हृदये॥वामदेवाय नमो० गुह्ये॥सद्योजातं प्रपद्यामि
० पादयोः॥अग्निरिति भस्म।जलमिति भस्म।स्थलमिति भस्म।व्योमेति भस्म।सर्वा
स्मकमिदं भस्म।सर्वं ह वा इदं भस्म॥ओं मानस्तोके तनये० इति सर्वांगं विलिप्य॥स्ना
त्वाचम्य प्राणानायम्य॥उत्सर्जनांगत्वेन गोमयस्नानं करिष्ये॥गोमयं वीक्ष्यमादाय स
व्यपाणौ व्याहृतिभिः त्रिधा विभज्य दक्षिणभागं प्रणवेन विदिक्षु विनिक्षिप्य उत्तरं ती
र्थे क्षिप्त्वा मध्यमं मानस्तोक इत्यभिमंत्र्य॥गंधद्वारां दुराधर्षां०॥अग्रमग्रं चरंतीनामो
षधीनां वने वने।तासामृषभपत्नीनां पवित्रं कायशोधनं।तन्मे रोगांश्च शोकांश्च नुद
गोमय सर्वदा॥इति शिरः प्रभृत्यंगानि विलिप्य।स्नात्वाचम्य प्राणानायम्य॥उत्सर्जनांग

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

तेनमृत्तिकास्नानंकरिष्ये॥ॐबळित्थापर्वतानां०ऋक॥भूमिंप्रार्थ्य॥मावोरिषत्खनिता
०ऋक॥इतिखनित्वा॥स्योनापृथिवीभवा०ऋक॥इतिमृदमादाय॥आयनेतपरायणे०
इतिदूर्वामादाय॥तत्सवितुर्वरेण्यं०ऋक॥इतिप्रोक्ष्यभूमौमृदंक्षिपेत्॥ॐत्रातारमिंद्रमवि
तारमिंद्रं०ऋक॥इतिपूर्वस्यां॥ॐयमायसोमंसुनुत०ऋक॥इतिदक्षिणतः॥ॐतत्वा
यामिब्रह्मणा०ऋक॥इतिपश्चिमतः॥वयंसोमव्रते०ऋक॥इत्युत्तरतः॥ॐतत्सूर्य
रोदसीउभे०ऋक॥इत्युपरिष्टात्॥ॐअधःपश्यस्वमोपरि०ऋक॥इत्यधः॥मृदं
दक्षिणांगेषुक्षिपेत्॥ॐसहस्रशीर्षापुरुषः०ऋकइतिशिरसि॥ॐअक्षीभ्यांतेना
सिकाभ्यां०ऋक।इतिमुखे॥ग्रीवाभ्यस्तउष्णिहाभ्यः०ऋक।कंठे।ॐआंत्रेभ्यस्ते
गुदाभ्यः०ऋक।हृदये॥नाभानाभिंनआददे०ऋक।नाभौ॥त्वामिंद्रसजोषसं०ऋ
क।बाह्वोः॥ॐसोमानंस्वरणं०॥ऋक।कक्षयोः॥ॐयःकुक्षिःसोमपातमः०ऋ
क।कुक्ष्योः॥ॐबह्वीनांपिताबहुरस्यपुत्रः०ऋक।इतिपृष्ठे॥ऊरुभ्यांतेअष्ठी
वद्भ्यांइत्यूर्वोः॥मेहनाद्वनंकरणात्०ऋक।जान्वोः॥एतावानस्यमहिमा०ऋक।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDE

उ॰स॰ पादयोः॥ॐ यस्यविश्वानिहस्तयोः॰ ऋक्॰। हस्तयोः॥ॐ अगादगाल्लोम्नो लोम्नो॰।
ऋक्॰। अनेनसहस्रशीर्षापुरुषसूक्तेनचसर्वांगोद्वर्तनंकुर्यात्॥ॐ अश्वक्रांतेरथ
४ क्रांते॰ गच्छामिपरमांगतिं॥इतिमंत्रेणसतिलदूर्वांमृदंशिरसिनिधायमृत्तिकास्नानंकु
र्यात्॥आचम्यप्राणानायम्य॥तीर्थंप्रार्थयेत्॥हिरण्यशृंगंवरुणंप्रपद्ये॰ गच्छेद्वरुसं
सलोकतां॥अवतेहेडइतिद्वयोः अजीगर्तिःशुनःशेपोवरुणस्त्रिष्टुप्॥वरुणप्रार्थने॰
ॐ अवतेहेडोवरुणनमोभिः॰ ऋक्॰। उदुत्तमंवरुणपाशं॰ ऋक्॰॥प्रपद्येवरुणंदेव
मंभसांपतिमूर्जितं॥याचितंदेहिमेतीर्थंसर्वपापमनुत्तमं॥तीर्थमावाहयिष्यामि
सर्वाघविनिषूदन॥संनिधानमस्मिंस्तोयेनस्थीयतांमदनुग्रहात्॥इतिश्लोकद्वये
नवरुणंसंप्रार्थ्य॥तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम।भैरवायनमस्तुभ्यमनु रा॰
ज्ञांदातुमर्हसि॥सागरस्यतुनिर्घोषदंडहस्तसुरांतक॥जगत्स्रष्टाजगन्मर्दनमा ४
मित्वांसुरेश्वर॥इमंमंत्रंसमुच्चार्यतीर्थस्नानंसमाचरेत्॥अन्यथातत्फलंस्याद्यतो
मिंत्वासुरेश्वर॥इमंमंत्रंसमुच्चार्यतीर्थेस्नानंसमाचरेत्॥अन्यथातत्फलंस्याद्यतो
र्थेशोहरतिध्रुवं॥शरीरजर्जरेभूतेव्याधिग्रस्तेकलेवरे॥औषधंजाह्नवीतोयंवै

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्यो नारायणो हरिः ॥ पुष्करा द्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ आगच्छंतु पवित्राणि
स्नानकाले सदा पठेत् ॥ नंदिनी नलिनी सीता मालती च महापगा ॥ विष्णुपादाब्जसंभू
ता गंगा त्रिपथगामिनी ॥ भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी ॥ अनेन क्षेत्रपालं सं
प्रार्थ्य ॥ याः प्रवतो वसिष्ठो नद्यो जगती ॥ तीर्थाभिमर्शने विनि० ॥ ॐ याः प्रवतो निवत उद्व
ती० ऋ० ॥ जलाशयं प्रविश्य ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ॥ मुच्यते सर्वपा
पेभ्यो विष्णुलोकं स गच्छति ॥ ततः प्रवाहाभिमुखस्त्रिर्मज्जयित्वा ॥ हिरा चम्य ॥ आपो हि
ष्ठेति तिसृभिः ॥ समुद्रज्येष्ठा च तसृभिः ॥ तरत्समंदी वर्गः ॥ त्रिभिष्टुं देवसवितः इत्यादि
क्षीरं सर्पिर्मधूदकं ॥ एतदंताः पठेयुः ॥ इति मार्जयित्वा ॥ इमं मे गंगे० ऋ० ॥ इत्युदकमा
लोड्याचम्य ॥ ऋतं चेति तृचेनाघमर्षणं कृत्वा प्रवाहाभिमुखस्त्रिर्मज्जयित्वा ॥ स्नानां
गतर्पणं कृत्वा ॥ निवीती ऋषीन्पूजयेत् ॥ तत्र ॥ आचार्य प्राप्ताना यन्म्यातिथ्यादि सं
कीर्त्य अस्माकं समस्तपापक्षयार्थं उत्सर्जनविहितं ऋषिपूजनं करिष्ये ॥ द्वादशां
गुलप्रमाणं कं सप्त दर्भान्गृहीत्वा अग्रतश्चतुरंगुलं विहाय ॥ मध्ये एकांगुलप्रमाणं प्रदे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

जमदग्न०

कश्यपाय०२

उत्त० क्षिप्तां ग्रंथिं कृत्वा पीठं तेव स्थाप्य। तेषु तत्र शिष्यादिभिः सह कश्यपादि सप्त ऋषिमावाह्य।
५ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥ अरुंध
तीसहितानि यथाविभवं पूजयित्वा। ऋषभं त्र्यृ कृतां स्तोमैः० ऋकं॥ अत्रिर्यद्वामवरोहन्नृ० ऋक० अत्रये०
भरद्वाज एवानः स्पृधः समजा समत्सु० ऋकं॥ प्रसूतो भक्षमकरं चरावपि० ऋकं॥ अभि त्वा गोतमा गि विश्वामि
गौतमः रा० ऋकं॥ गृणाना जमदग्निना० ऋकं॥ उतासि मैत्रावरुणो वसिष्ठ० ऋकं॥ अत्रेर्यथानसू वसिष्ठः
अरुंध० यास्यात्० ऋकं॥ सप्त कर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः। सर्वपापक्षयो पाहंतु ज्ञानतो
ज्ञानतः कृतं॥ इति पूजयित्वा तर्पणं कुर्यात्॥ सावित्रीं तर्पयामि॥ ब्रह्माणं त० श्रद्धां त० मे
धां त० प्रज्ञां त० धारणां त० सदसस्पतिं त० अनुमतिं त० छंदांस्यृषीन्त० अग्निं त० [illegible]
सूर्यं त० अग्निं त० शकुंतं त० अग्निं त० मित्रावरुणौ तृप्ये० अग्निं त० अपस्त० अग्निं त० मरु
तं त० अग्निं त० विश्वान्देवांस्तर्प० अग्निं त० इंद्रासोमौ तृप्येतां। इंद्रं त० अग्निं मरुतस्त० प
वमानसोमं त० सोमं त० अग्निं त० संज्ञानं त०। एतांस्तर्पयित्वा द्विवृष्या चार्यतर्पणं ब्र
ह्मयज्ञवत्कृत्वा। स्वपित्रादींस्तर्पयेत्। सव्येनवापसव्येनवा यमादींस्तर्पयेत्॥ ममसम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

स्तपापक्षयद्वारा श्रीपरमेश्वर धर्मराजप्रीत्यर्थं यमतर्पणं करिष्ये॥ यमं त० धर्मराजं तर्प०
मृत्युं त० अंतकं त० वैवस्वतं त० कालं त० सर्वभूतक्षयकरं त० औदुंबरं त० दध्नं तर्प० नीलं त०
परमेष्ठिनं त० वृकोदरं त० चित्रं त० चित्रगुप्तं त० यमो निहंता पितृधर्मराजो वैवस्वतो दंडध
रश्च कालः॥ प्रेताधिपो दत्तकृतानुसारी कृतांतमेतद्दशभिर्जपंति॥ इति दशवारं जपेत्।
ततः अकारादिहकारांतं ऋचः पठेयुः। ॐ आग्ना अग्न इहावसे० ऋक्। ॐ अग्नीवा संपरि
मातृरिहन्नु० ऋक्। ॐ अयं यज्ञो देवया अयंमियेध० ऋक्। अतीयामक्षि निदस्ति रपऋक्
ओ अग्ने रक्षाणो अंहसः० ऋक्। ॐ अग्ने भव सुषमिधा समिध्यः० ऋक्। अद्या मुरीय यदि
यातुधानो अस्मि० ऋक्। अध्वर्यो द्रावया त्वं० ऋक्। अग्निं दूतं पुरो दधे० ऋक्। अग्ने बाधस्व
विमृधः० ऋक्। अकारादिहकारांतं स्नानकाले सदा पठेत्। ब्रह्महत्यासहस्राणि भ्रू
णहत्याशतानि च। उपपातककोटीनां ब्रह्महत्या विनिर्दिशेत्। सर्वपापविनिर्मुक्तो शि
वसायुज्यमाप्नुयात्। ततः शांत्यर्थं। आनो भद्राः० शं न इंद्राग्नी० यस्मूष्टिति शांतिसू
क्तानि। सृष्ट्यर्थं। तिस्रो वाचः। पर्जन्याय प्रगायत० बळित्था पर्वतानां० प्रदेवत्रा ब्रह्म

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

उत्स०

६

योगात्कुरेतु॰ इतिपर्जन्यसूक्तानि ॥ ऋषयो वै सरस्वत्या इति ब्राह्मणं वैदिकाः पठंते ॥
ततो वेदग्रीत्यर्थं ब्राह्मणान्भोजयेत् ॥ इत्युत्सर्जनं समाप्तं ॥ अथोपाकर्म ॥ आचा
र्यः सुस्नातः प्राणानायम्य देशकालौ स्मृत्वा । मम अध्यापितानां चाध्येष्यमाणानां छंदसां
यातयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकर्माख्यं करिष्ये । अग्निं
प्रतिष्ठाप्य समिद्द्वयमादायास्मिन्नुपाकर्महोमे देवतापरिग्रहार्थमित्यादि चक्षुषी आ
ज्येनेत्यंतमुक्त्वा । सावित्रीमित्यादिछंदांस्यृषीनेताः प्रधानदेवता आज्येन । अग्निमित्या
दिसंज्ञानमेताः प्रधानदेवता दधिसक्तुद्रव्येण । शेषेण स्विष्टकृतमिध्मसंनहनेन रुद्रंपरस्मा
स्मानं यज्ञोपवीतेनायासमग्निमित्यादि सद्योयक्ष्य इत्यंतमुक्त्वा समिद्द्वयमग्नावाधायोद्देश
त्यागो कृत्वा । परिसमूहनाद्याज्येदर्भाग्रहूयजक्षेपणांतं कृत्वा दधिसक्तू चतुस्थाली स्थो
पितृपात्रे निधायाज्येन सह त्रिः पर्यग्निकरणादि नवप्रधानाहुत्यंतं प्राग्वत् ॥ स्रुच्यवदा
नधर्मेण दधिसक्तूनवदाय । अग्निमीळ इत्यादिसंज्ञानमेतैर्मंत्रैर्हुत्वा । स्विष्टकृदाद्युपप्र
हरणं कृत्वा । सर्वे सह दधिसक्तून्प्राश्नीयुः ॥ प्राशनं दधिसक्तूनामुपवीती परिग्रहः । मार्ज

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥श्रीगणेशायनमः॥ संकल्पःसूक्तपठनंमार्जनंचाघमर्षणं।देवतातर्पणंचैवस्नानंपंचां ल. .ं..तीर्थप्रार्थ
नत्वायाभिर्ऋक् १॥अवतेहेळोऋक् १॥उदुत्तमंवरुण.. ऋक् १॥नंदिनीनलिनी ..ता मालतीचमलापहा॥विष्टु
दाब्जसंभूता।गंगात्रिपथगामिनी १ भागीरथीभोगवतीजाह्नवीत्रिदशेश्वरी॥द्वा.दशैतानिनामानियत्रयत्रजं
लाशये २ स्नानकालेपठेन्नित्यंतत्रसंनिहिता. ता.हिरण्यशृं..रुणंप्रपद्येतीर्थंमेदेहियाचितः ३ य
न्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः॥यन्मेम.सावाचाकर्मणावा। ..तंकृतं॥तंनइंद्रोवरुणोबृहस्प
तिःसविताचपुनंतुपुनःपुनः।इमंमेगंगेऋक् १॥इदंतेन्याभिःऋक् १॥गंगागंगेति०।सुमित्र्यानआपओषधयः
संतु।दुर्मित्र्यास्तस्मैसंतुयो..।न्द्वेष्टियंचवयंद्विष्मः।सूक्तानि।प्रसम्राजेबृहदर्चावर्गः २ समुद्रज्येष्ठाः०ऋ ६
क्।एतोन्विंद्रं०ऋक् ३॥ त..मंदीधावतिऋक् ४ त्रि।भेस्तुदेवसप्तऋक् ७ पावमानीःस्वस्त्ययनीःसु..घृतेप
द।मार्जनं॥आपोहिष्ठेतिन..नं०।गायत्री।केशवादि.. अंवयोयंत्यध्वभिःऋक् ८॥याःप्रवतःऋक् १
इतिमार्जनं।इमंमेगंगेत्यकदकृमा..ेन।ऋतंचेतित्रे..ाघमर्षणंकृत्वा।प्रवाहाभिमुखास्त्रिमज्जयित्वा
चेष्य।।अथतर्पणं॥ब्रह्मादयोयेदेवाः।तांदे.ंस्तर्पयामि॥भूर्देवां०।भुवर्दे०।स्वर्देवां०।भूर्भुवःस्वर्देवांस्त०॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कृष्णद्वैपायनाद्योयेऋषयः॥ तान्नृषीं०। भूर्ऋषीं०। भुवर्ऋषीं०। स्वर्ऋषीं०। भूर्भुवः स्वर्ऋषीं०। सोमः पितृ
मान्यमोअंगिरस्वानग्निष्वात्ताः कव्यवाहनादयोयेपितरः। तान्पितॄंस्त०। भूः पितॄं०। भुवः पितॄं०। स्वः
पितॄं०। भूर्भुवः स्वः पितॄं स्त०॥ अग्निदग्धाश्चयेजीवा येप्यदग्धाः कुलेमम॥ भूमौदत्तेनतोयेन
तृप्तायांतिपरांगतिं॥ इतिजलांजलिंतटेनिक्षिप्य। यन्मयादूषितंतोयंशारीरमलसंयुतं। तद्दोषप
रिहारार्थंयक्ष्माणंतर्पयाम्यहं। येचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः। तेगृह्णंतुमयादत्तं वस्त्र
निष्पीडनोदकं॥ इतिस्नानविधिः समाप्तः॥ शुभंभवतु॥ श्रीविजयादुर्गार्पणमस्तु॥ कामेश्वर॥ त्रिलो
चन॥ राम॥ लक्ष्मीनारायणायनमः॥ विश्वेश्वरायनमः। अंनपूर्णादेव्यैनमः॥ गजानन॥ कालभैरव॥
दंडपाणि॥ श्रीसरस्वत्यैनमः॥ श्रीगुरुचरणाभ्यांनमः॥ शिव॥ हनुमान॥ श्रीश्रीश्रीश्रीश्री॥ छ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri